# શ્રી દેવરાજગુરુભિ: અનુગ્રુહીતા
# ॥ પૂર્વ દિનચર્યા ॥

સૌમ્યજામાત્રુ યોગીન્દ્ર ચરણામ્બુજ ષટ્પદમ ।
દેવરાજગુરુમ વન્દે દિવ્યજ્ઞાન પ્રદમ શુભમ ॥

અઙ્કે કવેર કન્યાયા: તુઙ્ગે ભુવન મઙ્ગલે ।
રઙ્ગે ધામ્નિ સુખાસીનમ વન્દે વરવરમ મુનિમ ॥ 1

મયિ પ્રવિશતિ શ્રીમન મન્દિરમ રઙ્ગશાયિન: ।
પત્યુ: પદામ્બુજમ દ્રષ્ટુમ આયાન્તમ અવિદૂરત: ॥ 2

સુધાનિધિમ ઈવ સ્વૈરસ્વીકુતો દગ્ર વિગ્રહમ ।
પ્રસન્નાર્ક પ્રતીકાશ પ્રકાશ પરિવેષ્ટિતમ ॥ 3

પાર્શ્વત: પાણિ પદ્માભ્યામ પરિગ્રુહ્ય ભવત્પ્રિયૌ ।
વિનયસ્યન્તમ શનૈ: અઙ્ઘ્રી મ્રુદુલૌ મેદિનીતલે ॥ 4

આમ્લાન કોમલાકારમ આતામ્ર વિમલામ્બરમ ।
આપીન વિપુલોરસ્કમ આજાનુભુજ ભૂષણમ ॥ 5

મ્રુણાલ તન્તુસન્તાન સમ્સ્થાન ધવલત્વિષા ।
શોભિતમ યજ્ઞસૂત્રેણ નાભિ બિમ્બ સનાભિના ॥ 6

અમ્ભોજ બીજ માલાભિ: અભિજાત ભુજાન્તરમ ।
ઊર્ધ્વ પુણ્ડ્રૈ: ઉપશ્લિષ્ટમ ઉચિત સ્થાન લક્ષણૈ: ॥ 7

કાશ્મીર કેસરસ્તોમ કડારસ્નિગ્ધ રોચિષા ।
કૌશેયેન સમિન્ધાનમ સ્કન્ધમૂલ અવલમ્બિના ॥ 8

મન્ત્ર રત્ન અનુસન્ધાન સન્તત સ્ફુરિતાધરમ ।
તદર્થ તત્વ નિધ્યાન સન્નદ્ધ પુલકોદ્ગમમ ॥ 9

સ્મયમાન મુખામ્ભોજમ દયમાન દ્રુગઞ્ચલમ ।
મયિ પ્રસાદ પ્રવણમ મધુરોદાર ભાષણમ ॥ 10

આત્મલાભાત પરમ કિઞ્ચિત અન્યન્નાસ્તિ ઈતિ નિશ્ચયાત ।
અઙ્ગી કર્તુમ ઈવ પ્રાપ્તમ અકિઞ્ચનમ ઈમમ જનમ ॥ 11

ભવન્તમ એવ નીરન્ધ્રમ પશ્યન વશ્યેન ચેતસા ।
મુને! વરવર! સ્વામિન મુહુ: ત્વામ એવ કીર્તયન ॥ 12

ત્વદન્ય વિષય સ્પર્શ વિમુખૈ: અખિલેન્દ્રિયૈ: ।
ભવેયમ ભવ દુ:ખાનામ અસહ્યાનામ અનાસ્પદમ ॥ 13

પરેદ્યુ: પશ્ચિમે યામે યામિન્યા: સમુપસ્થિતે ।
પ્રબુધ્ય શરણમ ગત્વા પરામ ગુરુપરમ્પરામ ॥ 14

ધ્યાત્વા રહસ્ય ત્રિતયમ તત્વ યાથાત્મ્ય દર્પણમ ।
પર વ્યૂહાદિકાન પત્યુ: પ્રકારાન પ્રણિધાય ચ ॥ 15

તત: પ્રત્યુષસિ સ્નાત્વા કૃત્વા પૌર્વાહ્ણિકી: ક્રિયા: ।
યતીન્દ્ર ચરણ દ્વન્દ્વ પ્રવણેનૈવ ચેતસા ॥ 16

અથ રઙ્ગ નિધિમ સમ્યક અભિગમ્ય નિજમ પ્રભુમ ।
શ્રીનિધાનમ શનૈ: તસ્ય શોધયિત્વા પદદ્વયમ ॥ 17

તત: તત સન્નિધિ સ્તમ્ભ મૂલ ભૂતલ ભૂષણમ ।
પ્રાઙ્મુખમ સુખમ આસીનમ પ્રસાદ મધુરસ્મિતમ ॥ 18

ભૃત્યૈ: પ્રિય હિતૈકાગ્રૈ: પ્રેમ પૂર્વમ ઉપાસિતમ ।
તત પ્રાર્થન અનુસારેણ સમ્સ્કારાન સમ્વિધાય મે ॥ 19

અનુકમ્પા પરીવાહૈ: અભિષેચન પૂર્વકમ ।
દિવ્યમ પદદ્વયમ દત્વા દીર્ઘમ પ્રણમતો મમ ॥ 20

સાક્ષાત ફલૈક લક્ષ્યત્વ પ્રતિપત્તિ પવિત્રિતમ ।
મન્ત્ર રત્નમ પ્રયચ્છન્તમ વન્દે વરવરમ મુનિમ ॥ 21

તત: સાર્ધમ વિનિર્ગત્ય ભૃત્યૈ: નિત્યાનપાયિભિ: ।
શ્રીરઙ્ગ મઙ્ગલમ દ્રષ્ટુમ પુરુષમ ભુજગેશયમ ॥ 22

મહતિ શ્રીમતિ દ્વારે ગોપુરમ ચતુરાનનમ ।
પ્રણિપત્ય શનૈ: અન્ત: પ્રવિશન્તમ ભજામિ તમ ॥ 23

દેવી ગોદા યતિપતિ શટદ્વેષિણૌ રઙ્ગ શ્રુઙ્ગમ
સેનાનાથો વિહગ વ્રુષભ: શ્રીનિધિ: સિન્ધુ કન્યા ।
ભૂમાનિલા ગુરુજનવ્રુત: પુરુષ: ચેત્યમીષામ અગ્રે
નિત્યમ વરવરમુને: અઙ્ઘ્રિ યુગ્મમ પ્રપદ્યે ॥ 24

મઙ્ગળાશાસનમ ક્રુત્વા તત્ર તત્ર યથોચિતમ ।
ધામ્ન: તસ્માત વિનિષ્ક્રમ્ય પ્રવિશ્ય સ્વમ નિકેતનમ ॥ 25

અથ શ્રીશૈલ નાથાર્ય નામ્નિ શ્રીમતિ મણ્ડપે ।
તદઙ્ઘ્રિ પઙ્કજ દ્વન્દ્વ: છાયા મધ્ય નિવાસિનામ ॥ 26

તત્ત્વમ દિવ્યપ્રબન્ધાનામ સારમ સમ્સાર વૈરિણામ ।
સરસમ સરહસ્યાનામ વ્યાચક્ષાણમ નમામિ તમ ॥ 27

તત: સ્વચરણામ્ભોજ સ્પર્શ સમ્પન્ન સૌરભૈ: ।
પાવનૈ: અર્થિનસ્તીર્થૈ: ભાવયન્તમ ભજામિ તમ ॥ 28

આરાધ્ય શ્રીનિધિમ પશ્ચાત અનુયાગમ વિધાય ચ ।
પ્રસાદ પાત્રમ મામ ક્રુત્વા પશ્યન્તમ ભાવયામિ તમ ॥ 29

તત: ચેત: સમાધાય પુરુષે પુષ્કરેક્ષણે ।
ઉત્તમ્સિત કર દ્વન્દ્વમ ઉપવિષ્ટમ ઉપહ્વરે ॥ 30

અબ્જાસનસ્થમ અવદાત સુજાત મૂર્તિમ
આમીલિતાક્ષમ અનુસમ્હિત મન્ત્ર રત્નમ ।
આનમ્રમૌલિભિ: ઉપાસિતમ અન્તરઙ્ગૈ:
નિત્યમ મુનિમ વરવરમ નિભ્રુતો ભજામિ ॥ 31

તત: શુભાશ્રયે તસ્મિન નિમગ્નમ નિભ્રુતમ મન: ।
યતીન્દ્ર પ્રવણમ કર્તુમ યતમાનમ નમામિ તમ ॥ 32

**॥ ઈતિ પૂર્વ દિનચર્યા સમાપ્તા ॥**